कमलाष्टकं

न्यंकावरातिभयशंकाकुले धृतदृगंकायतिः प्रणमतां
शंकाकलंकयुतपंकायताश्मशितटंकायितस्वचरिता ।
त्वं कालदेशपदशंकातिपातिपतिसंकाश वैभवयुता
शं काममातरनिशं कामनीयमिह संकाशयाशु कृपया ॥1॥

आचांतरंगदलिमोचांतरंगरुचिवाचां तरंगगतिभिः
काचाटनाय कटुवाचाटभावयुतनीचाटनं न कलये ।
वाचामगोचरसदाचारसूरिजनताचातुरीविवृतये
प्राचां गतिं कुशलवाचां जगज्जननि याचामि देवि भवतीं ॥2॥

चेटीकृतामरवधूटीकराग्रधृतपेटीपुटार्घ्यसुमनो-
वीटीदलक्रमुकपाटीरपंकनवशाटीकृतांगरचना ।
खेटीकमानशतकोटीकराब्जजजटाटीरवंदितपदा
या टीकतेऽब्जवनमाटीकतां हृदयवाटीमतीव कमला ॥3॥

स्वांतांतरालकृतकांतागमांतशतशांतांतराघनिकराः
शांतार्थकांतवकृतांता भजंति हृदि दांता दुरंततपसा ।
यां तानतापभवतांतातिभीतजगतां तापनोदनपटुं
मां तारयत्वशुभकांतारतोऽद्य हरिकांताकटाक्षलहरी ॥4॥

यां भावुका मनसि संभावयंति भवसंभावनापहृतये
त्वं भासि लक्ष्मि सततं भाव्ययद्भवनसंभावनादिविधये ।
जंभारिसंपदुपलंभादिकारणमहं भाव्यमंघ्रियुगलं
संभावये श्रुतिषु संभाषितं वचसि संभाष्य तस्य तव च ॥5॥

दूरावधूतमधुधारागिरोच्चकुचभारानतांगलतिका-
सारांगलिप्तघनसारार्द्रकुंकुमरसा राजहंसगमना ।
वैराकरस्मरविकारापसंसरणवाराशिमग्नमनसः
श्रीराविरस्तु धुरि ताराय मे गुरुभिरारधिता भगवती ॥6॥

श्रीवासधूपकनदावासदीपरुचिरावासभूपरिसरा
श्रीवासदेशलसदावापकाशरदभावाभकेशनिकरा ।
श्रीवासुदेवरमणी वामदेवविधिदेवाधिपावनपरा
श्रीवासवस्तुनरदेवाहतस्तुतिसभावा मुदेऽस्तु सुतरां ॥7॥

भाषादिदेवकुलयोषामणिस्तवनघोषांचितस्वसविधा
दोषाकुले जगति पोषाकुला सपदि शेषाहि शायिदयिता ।
दोषालयस्य मम दोषानपोह्य गतदोषाभिनंद्यमहिमा
शेषाशनाहिरिपुशेषादिसंपद विशेषां ददातु विभवान् ॥8॥

इति श्रीकमलाष्टकं संपूर्णं ।